# Shri Guru Gita

## શ્રીગુરુગીતા

## Document Information

Text title : Shri Guru Gita

File name : shriigurugiitaadharmamandala.itx

Category : gItA, giitaa, gurudev

Location : doc_giitaa

Transliterated by : sunder hattangadi

Proofread by : sunder hattangadi

Description-comments : Dharmamandala print version

Latest update : August 25, 2023

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 25, 2023

*sanskritdocuments.org*

# શ્રીગુરુગીતા

॥ અથ શ્રીગુરુગીતા ॥

ઋષય ઊચુઃ ।
ગુહ્યાદ્ગુહ્યતરા વિદ્યા ગુરુગીતા વિશેષતઃ ।
બ્રૂહિ નઃ સૂત કૃપયા શ‍ૃણુમસ્ત્વત્પ્રસાદતઃ ॥ ૧॥

સૂત ઉવાચ ।
ગિરીન્દ્રશિખરે રમ્યે નાનારત્નોપશોભિતે ।
નાનાવૃક્ષલતાકીર્ણે નાનાપક્ષિરવૈર્યુતે ॥ ૨॥

સર્વર્તુકુસુમામોદમોદિતે સુમનોહરે ।
શૈત્યસૌગન્ધ્યમાન્દ્યાઢ્યમરુદ્ભિરુપવીજિતે ॥ ૩॥

અપ્સરોગણસઙ્ગીતકલધ્વનિનિનાદિતે ।
સ્થિરચ્છાયાદ્રુમચ્છાયાચ્છાદિતે સ્નિગ્ધમઞ્જુલે ॥ ૪॥

મત્તકોકિલસન્દોહસઙ્ઘુષ્ટવિપિનાન્તરે ।
સર્વદા સ્વગણૈઃ સાર્દ્ધમૃતુરાજનિષેવિતે ॥ ૫॥

સિદ્ધચારણગન્ધર્વગાણપત્યગણૈર્વૃતે ।
તત્ર મૌનધરં દેવં ચરાચરજગદ્ગુરુમ્ ॥ ૬॥

સદાશિવં સદાનન્દં કરુણામૃતસાગરમ્ ।
કર્પૂરકુન્દધવલં શુદ્ધતત્ત્વમયં વિભુમ્ ॥ ૭॥

દિગમ્બરં દીનનાથં યોગીન્દ્રં યોગિવલ્લભમ્ ।
ગઙ્ગાશીકરસંસિક્તજટામણ્ડલમણ્ડિતમ્ ॥ ૮॥

વિભૂતિભૂષિતં શાન્તં વ્યાલમાલં કપાલિનમ્ ।
અન્ધકારિં ત્રિલોકેશં ત્રિશૂલવરધારકમ્ ॥ ૯॥

આશુતોષં જ્ઞાનમયં કૈવલ્યફલદાયકમ્ ।

નિર્વિકલ્પં નિરાતઙ્કં નિર્વિશેષં નિરઞ્જનમ્ ॥ ૧૦॥

સર્વેષાં હિતકર્તારં દેવદેવં નિરામયમ્ ।
કૈલાસશિખરાસીનં પઞ્ચવક્ત્રં સુભૂષિતમ્ ॥ ૧૧॥

સર્વાત્મનાવિષ્ટચિત્તં ગિરિજામુખપઙ્કજે ।
પ્રણમ્ય પરયા ભક્ત્યા કૃતાઞ્જલિપુટા સતી ॥ ૧૨॥

પ્રસન્નવદનં વીક્ષ્ય લોકાનાં હિતકામ્યયા ।
વિનયાઽવનતા દેવી પાર્વતી શિવમબ્રવીત્ ॥ ૧૩॥

શ્રીમહાદેવ્યુવાચ ।
નમસ્તે દેવદેવેશ સદાશિવ જગદ્ગુરો ।
પ્રાણેશ્વર મહાદેવ ગુરુગીતાં વદ પ્રભો ॥ ૧૪॥

કેન માર્ગેણ ભોઃ સ્વામિન્ દેહી બ્રહ્મમયો ભવેત્ ।
ત્વં કૃપાં કુરુ મે દેવ નમામિ ચરણં તવ ॥ ૧૫॥

શ્રી મહાદેવ ઉવાચ ।
ગુશબ્દસ્ત્વન્ધકારઃ સ્યાદ્રુશબ્દસ્તન્નિરોધકઃ ।
અન્ધકારનિરોધિત્વાદ્ગુરુરિત્યભિધીયતે ॥ ૧૬॥

ગુકારઃ પ્રથમો વર્ણો માયાદિગુણભાસકઃ ।
રુકારો દ્વિતીયો બ્રહ્મ માયાભ્રાન્તિવિમોચકઃ ॥ ૧૭॥

ગકારઃ સિદ્ધિદઃ પ્રોક્તો રેફઃ પાપસ્ય દાહકઃ ।
ઉકારઃ શમ્ભુરિત્યુક્તસ્ત્રિતયાઽઽત્મા ગુરુઃ સ્મૃતઃ ॥ ૧૮॥

શ્રીમહાદેવ્યુવાચ ।
માયામોહિતજીવાનાં જન્મમૃત્યુજરાદિતઃ ।
રક્ષાર્થૈ કઃ પ્રભવતિ સ્વામિન્ સંસારસાગરે ॥ ૧૯॥

ત્વત્તો નાઽન્યો દયાસિન્ધો કશ્ચિચ્છક્નોતિ વૈ પ્રભો ।
દાતું પ્રતિવચશ્ચાઽસ્ય લોકશોકવિમોચનમ્ ॥ ૨૦॥

ત્રિતાપતપ્તજીવાનાં કલ્યાણાર્થં મયા પ્રભો ।
વિહિતઃ સાદરં પ્રશ્ન ઉત્તરેણાઽનુગૃહ્યતામ્ ॥ ૨૧॥

શ્રીમહાદેવ ઉવાચ ।
સંસારાઽપારપાથોધેઃ પારં ગન્તું મહેશ્વરિ ।

શ્રીગુરોશ્ચરણાઽમ્ભોજનૌકૈવૈકાઽવલમ્બનમ્ ॥ ૨૨॥

સદ્ગુરો રૂપમાદાય જગત્યામહમેવ હિ ।
ઉદ્ધરામ્યખિલાઞ્જીવાન્મૃત્યુસંસારસાગરાત્ ॥ ૨૩॥

યો ગુરુઃ સ શિવઃ સાક્ષાદ્યઃ શિવઃ સ ગુરુર્મતઃ ।
ગુરૌ મયિ ન ભેદોઽસ્તિ ભેદસ્તત્ર નિરર્થકઃ ॥ ૨૪॥

ગુરુર્જ્ઞાનપ્રદો નિત્યં પરમાઽઽનન્દસાગરે ।
ઉન્મજ્જયતિ જીવાન્સ તાઁસ્તથૈવ નિમજ્જયન્ ॥ ૨૫॥

ગુરુસ્ત્રિતાપતપ્તાનાં જીવાનાં રક્ષિતા ક્ષિતૌ ।
સચ્ચિદાનન્દરૂપં હિ ગુરુર્બ્રહ્મ ન સંશયઃ ॥ ૨૬॥

યાદૃગસ્તીહ સમ્બન્ધો બ્રહ્માણ્ડસ્યેશ્વરેણ વૈ ।
તથા ક્રિયાઽઽખ્યયોગસ્ય સમ્બન્ધો ગુરુણા સહ ॥ ૨૭॥

દીક્ષાવિધાવીશ્વરો વૈ કારણસ્થલમુચ્યતે ।
ગુરુઃ કાર્યસ્થલઞ્ચાઽતો ગુરુર્બ્રહ્મ પ્રગીયતે ॥ ૨૮॥

ગુરૌ માનુપબુદ્ધિં તુ મન્ત્રે ચાઽક્ષરભાવનામ્ ।
પ્રતિમાસુ શિલાબુદ્ધિં કુર્વાણો નરકં વ્રજેત્ ॥ ૨૯॥

જન્મહેતૂ હિ પિતરૌ પૂજનીયૌ પ્રયત્નતઃ ।
ગુરુર્વિશેષતઃ પૂજ્યો ધર્માઽધર્મપ્રદર્શકઃ ॥ ૩૦॥

ગુરુઃ પિતા ગુરુર્માતા ગુરુર્દેવો ગુરુર્ગતિઃ ।
શિવે રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ॥ ૩૧॥

શ્રીમહાદેવ્યુવાચ ।
જગન્મઙ્ગલકૃન્નાથ વિશેષેણોપદિશ્યતામ્ ।
લક્ષણં સદ્ગુરોર્યેન સમ્યગ્જ્ઞાતં ભવેદ્ધ્રુવમ્ ॥ ૩૨॥

આચાર્યગુરુભેદોઽપિ યેન સ્યાદ્વિદિતો મમ ।
શ્રેષ્ઠત્વં વા તયોઃ કેન લક્ષણેનાઽનુમીયતે ॥ ૩૩॥

શ્રીમહાદેવ ઉવાચ ।
સર્વશાસ્ત્રપરો દક્ષઃ સર્વશાત્રાર્થવિત્સદા ।
સુવચાઃ સુન્દરઃ સ્વઙ્ગઃ કુલીનઃ શુભદર્શનઃ ॥ ૩૪॥

જિતેન્દ્રિયઃ સત્યવાદી બ્રાહ્મણઃ શાન્તમાનસઃ ।

માતૃપિતૃહિતે યુક્તઃ સર્વકર્મપરાયણઃ ॥ ૩૫॥

આશ્રમી દેશવાસી ચ ગુરુરેવં વિધીયતે ।
આચાર્યગુરુશબ્દૌ દ્વૌ ક્વચિત્પર્યાયવાચકૌ ॥ ૩૬॥

એવમર્થગતો ભેદો ભવત્યપિ તયોઃ ક્વચિત્ ।
ઉપનીય દદદ્વેદમાચાર્યઃ સ ઉદાહૃતઃ ॥ ૩૭॥

યઃ સાધનપ્રકર્ષાર્થં દીક્ષયેત્સ ગુરુઃ સ્મૃતઃ ।
ઔપપત્તિકમંશન્તુ ધર્મશાસ્ત્રસ્ય પણ્ડિતઃ ॥ ૩૮॥

વ્યાચષ્ટે ધર્મમિચ્છૂનાં સ આચાર્યઃ પ્રકીર્તિતઃ ।
સર્વદર્શી તુ યઃ સાધુર્મુમુક્ષૂણાં હિતાય વૈ ॥ ૩૯॥

વ્યાખ્યાય ધર્મશાસ્ત્રાણાં ક્રિયાસિદ્ધિપ્રબોધકમ્ ।
ઉઅપાસનાવિધેઃ સમ્યગીશ્વરસ્ય પરાત્મનઃ ॥ ૪૦॥

ભેદાન્પ્રશાસ્તિ ધર્મજ્ઞઃ સ ગુરુઃ સમુદાહૃતઃ ।
સપ્તાનાં જ્ઞાનભૂમીનાં શાસ્ત્રોક્તાનાં વિશેષતઃ ॥ ૪૧॥

પ્રભેદાન્ યો વિજાનાતિ નિગમસ્યાઽઽગમસ્ય ચ્ અ ।
જ્ઞાનસ્ય ચાઽધિકારઁાસ્ત્રીન્ભવતાત્પર્યલક્ષ્યતઃ ॥ ૪૨॥

તન્ત્રેષુ ચ પુરાણેષુ ભાષાયાસ્ત્રિવિધાં સૃતિમ્ ।
સમ્યગ્ભેદૈર્વિજાનાતિ ભાષાતત્ત્વવિશારદઃ ॥ ૪૩॥

નિપુણો લોકશિક્ષાયાં શ્રેષ્ઠાઽઽચાર્યઃ સ ઉચ્યતે ।
પઞ્ચતત્ત્વવિભેદજ્ઞઃ પઞ્ચભેદાં વિશેષતઃ ॥ ૪૪॥

સગુણોપાસનાં યસ્તુ સમ્યગ્જાનાતિ કોવિદઃ ।
ચાતુર્વિધ્યેન વિતતાં બ્રહ્મણઃ સમુપાસનામ્ ॥ ૪૫॥

ગમ્ભીરાર્થાં વિજાનીતે બુધો નિર્મલમાનસઃ ।
સર્વકાર્યેષુ નિપુણો જીવન્મુક્તસ્ત્રિતાપહૃત્ ॥ ૪૬॥

કરોતિ જીવકલ્યાણં ગુરુઃ શ્રેષ્ઠઃ સ કથ્યતે ॥ ૪૭॥

શ્રીમહાદેવ્યુવાચ ।
સચ્છિષ્યલક્ષણં નાથ ઉક્ષૂણાં ત્રિતાપહૃત્ ।
ગુરુભક્તસ્ય શિષ્યસ્ય કર્તવ્યઞ્ચાઽપિ મે વદ ॥ ૪૮॥

મુમુક્ષુભિશ્ચ શિષ્યૈઃ કૈઃ શુભાઽઽચારૈરવાપ્યતે ।
આત્મજ્ઞાનં દયાસિન્ધો કૃપયા બ્રૂહિ તાનપિ ॥ ૪૯॥

યેન જ્ઞાનેન લબ્ધેન શુભાઽઽચારાન્વિતૈર્દ્રુતમ્ ।
મુચ્યતે બન્ધનાન્નાથ શિષ્યૈઃ સદ્ગુરુસેવકૈઃ ॥ ૫૦॥

શ્રીમહાદેવ ઉવાચ ।
શિષ્યઃ કુલીનઃ શુદ્ધાઽઽત્મા પુરુષાર્થપરાયણઃ ।
અધીતવેદઃ કુશલો દૂરમુક્તમનોભવઃ ॥ ૫૧॥

હિતૈષી પ્રાણિનાં નિત્યમાસ્તિકસ્ત્યક્તવઞ્ચનઃ ।
સ્વધર્મનિરતો ભક્ત્યા પિતૃમાતૃહિતે સ્થિતઃ ॥ ૫૨॥

ગુરુશુશ્રૂષણરતો વાઙ્મનઃકાયકર્મભિઃ ।
શિષ્યસ્તુ સ ગુણૈર્યુક્તો ગુરુભક્તિરતઃ સદા ॥ ૫૩॥

ધર્મકામાદિસંયુક્તો ગુરુમન્ત્રપરાયણઃ ।
સત્યબુદ્ધિર્ગુરોમન્ત્રે દેવપૂજનતત્પરઃ ॥ ૫૪॥

ગુરૂપદિષ્ટમાર્ગે ચ સત્યબુદ્ધિરુદારધીઃ ।
અલુબ્ધઃ સ્થિરગાત્રશ્ચ આજ્ઞાકારી જિતેન્દ્રિયઃ ॥ ૫૫॥

એવંવિધો ભવેચ્છિષ્ય ઇતરો દુઃખકૃદ્ગુરોઃ ।
શરીરમર્થં પ્રાણાઁશ્ચ ગુરુભ્યો યઃ સમર્પયન્ ॥ ૫૬॥

ગુરુભિઃ શિષ્યતે યોગં સ શિષ્ય ઇતિ કથ્યતે ।
દીર્ઘદણ્ડવદાનમ્ય સુમના ગુરુસન્નિધૌ ॥ ૫૭॥

આત્મદારાઽઽદિકં સર્વં ગુરવે ચ નિવેદયેત્ ।
આસનં શયનં વસ્ત્રં વાહનં ભૂષણાઽઽદિકમ્ ॥ ૫૮॥

સાધકેન પ્રદાતવ્યં ગુરોઃ સન્તોષકારણાત્ ।
ગુરુપાદોદકં પેયં ગુરોરુચ્છિષ્ટભોજનમ્ ॥ ૫૯॥

ગુરુમૂર્તેઃ સદા ધ્યાનં ગુરુસ્તોત્રં સદા જપેત્ ।
ઊર્ધ્વં તિષ્ઠેદ્ગુરોરગ્રે લબ્ધાઽનુજ્ઞો વસેત્ પૃથક્ ॥ ૬૦॥

નિવીતવાસા વિનયી પ્રહ્વસ્તિષ્ઠેદ્ગુરૌ પરમ્ ।
ગુરૌ તિષ્ઠતિ તિષ્ઠેચ્ચોપવિષ્ટેઽનુજ્ઞયા વસેત્ ॥ ૬૧॥

સેવતાઽઙ્ઘ્રી શયાનસ્ય ગચ્છન્તઞ્ચાઽપ્યનુવ્રજેત્ ।

શરીરં ચૈવ વાચં ચ બુદ્ધીન્દ્રિયમનાંસિ ચ ॥ ૬૨॥

નિયમ્ય પ્રાઞ્જલિસ્તિષ્ઠેદ્વીક્ષમાણો ગુરોર્મુખમ્ ।
નિત્યમુદ્રિતપાણિઃ સ્યાત્ સાધ્વાચારઃ સુસંયતઃ ॥ ૬૩॥

આસ્યતામિતિ ચોક્તઃ સન્નાસીતાઽભિમુખં ગુરોઃ ।
હીનાન્નવસ્ત્રવેશઃ સ્યાત્ સર્વદા ગુરુસન્નિધૌ ॥ ૬૪॥

ઉત્તિષ્ઠેત્ પ્રથમં ચાઽસ્ય ચરમં ચૈવ સંવિશેત્ ।
દુષ્કૃતં ન ગુરોર્બ્રૂયાત્ ક્રુદ્ધં ચૈનં પ્રસાદયેત્ ॥ ૬૫॥

પરિવાદં ન શ્રૃણુયાદન્યેષામપિ કુર્વતામ્ ।
નીચં શય્યાસનં ચાઽસ્ય સર્વદા ગુરુસન્નિધૌ ॥ ૬૬॥

ગુરોસ્તુ ચક્ષુર્વિષયે ન યથેષ્ટાઽઽસનો ભવેત્ ।
ચાપલ્યં પ્રમદાગાથામહઙ્કારં ચ વર્જયેત્ ॥ ૬૭॥

નાઽપૃષ્ટો વચનં કિંચિદ્બ્રૂયાન્નાઽપિ નિષેધયેત્ ।
ગુરુમૂર્તિં સ્મરેન્નિત્યં ગુરુનામ સદા જપેત્ ॥ ૬૮॥

ગુરોરાજ્ઞાં પ્રકુર્વીત ગુરોરન્યં ન ભાવયેત્ ।
ગુરુરૂપે સ્થિતં બ્રહ્મ પ્રાપ્યતે તત્પ્રસાદતઃ ॥ ૬૯॥

જાત્યાશ્રમયશોવિદ્યાવિત્તગર્વં પરિત્યજન્ ।
ગુરોરાજ્ઞાં પ્રકુર્વીત ગુરોરન્યં ન ભાવયેત્ ॥ ૭૦॥

ગુરુવક્ત્રે સ્થિતા વિદ્યા ગુરુભક્ત્યાઽનુલભ્યતે ।
તસ્માત્ સર્વપ્રયત્નેન ગુરોરારાધનં કુરુ ॥ ૭૧॥

નોદાહરેદસ્ય નામ પરોક્ષમપિ કેવલમ્ ।
ન ચ વાઽસ્યાઽનુકુર્વીત ગતિભાષિતચેષ્ટિતમ્ ॥ ૭૨॥

ગુરોર્યત્ર પરીવાદો નિન્દા વાઽપિ પ્રવર્તતે ।
કર્ણૌ તત્ર પિધાતવ્યૌ ગન્તવ્યં વા તતોઽન્યતઃ ॥ ૭૩॥

પરીવાદાત્ ખરો ભવેત્ શ્વા વૈ ભવતિ નિન્દકઃ ।
પરિભોક્તા ભવેત્કૃમિઃ કીટો ભવતિ મત્સરી ॥ ૭૪॥

ગુરોઃ શય્યાઽસનં યાનં પાદુકોપાનૌત્પીઠકમ્ ।
સ્નાનોદકં તથા છાયાં કદાપિ ન વિલઙ્ઘયેત્ ॥ ૭૫॥

ગુરોરગ્રે પૃથક્ પૂજામૌદ્ધત્યં ચ વિવર્જયેત્ ।
દીક્ષાં વ્યાખ્યાં પ્રભુત્વં ચ ગુરોરગ્રે પરિત્યજેત્ ॥ ૭૬॥

ઋણદાનં તથાઽઽદાનં વસ્તૂનાં ક્રયવિક્રયમ્ ।
ન કુર્યાદ્ગુરુણા સાર્દ્ધં શિષ્યો ભૃત્વા કદાચન ॥ ૭૮॥

ન પ્રેરયેદ્ગુરું તાતં શિષ્યઃ પુત્રશ્ચ કર્મસુ ।
ગુરવે દેવિ પિત્રે ચ નિત્યં સર્વસ્વમર્પયેત્ ॥ ૭૯॥

સ ચ શિષ્યઃ સ ચ જ્ઞાની ય આજ્ઞાં પાલયેદ્ગુરોઃ ।
ન ક્ષેમં તસ્ય મૂઢસ્ય યો ગુરોરવચસ્કરઃ ॥ ૮૦॥

ગુરોર્હિતં પ્રકર્તવ્યં વાઙ્મનઃકાયકર્મભિઃ ।
અહિતાઽઽચરણાદ્દેવિ વિષ્ઠાયાં જાયતે કૃમિઃ ॥ ૮૧॥

યથા ખનન્ ખનિત્રેણ નરો વાર્યધિગચ્છતિ ।
તથા ગુરુગતાં વિદ્યાં શુશ્રૂષુરધિગચ્છતિ ॥ ૮૨॥

આસમાપ્તેઃ શરીરસ્ય યસ્તુ શુશ્રૂષતે ગુરુમ્ ।
સ ગચ્છત્યઞ્જસા વિપ્રો બ્રહ્મણઃ સદ્મ શાશ્વતમ્ ॥ ૮૩॥

શ્રીમહાદેવ્યુવાચ ।
હે વિશ્વાત્મન્ મહાયોગિન્ દીનબન્ધો જગદ્ગુરો ।
ત્રિતાપાદ્રક્ષિતું જીવાન્નેતું મુક્તેઃ પદં તથા ॥ ૮૪॥

યોગમાર્ગપ્રચારોઽત્ર ગુરુભિર્યઃ પ્રકાશિતઃ ।
તલ્લક્ષણાનિ ભેદાँશ્ચ કૃપયા વદ મે પ્રભો ॥ ૮૫॥

શ્રીમહાદેવ ઉવાચ ।
મન્ત્રયોગો લયશ્ચૈવ રાજયોગો હઠસ્તથા ।
યોગશ્ચતુર્વિધઃ પ્રોક્તો યોગિભિસ્તત્ત્વદર્શિભિઃ ॥ ૮૬॥

નામરૂપાત્મિકા સૃષ્ટિર્યસ્માત્તદવલમ્બનાત્ ।
બન્ધનાન્મુચ્યમાનોઽયં મુક્તિમાપ્નોતિ સાધકઃ ॥ ૮૭॥

તામેવ ભૂમિમાલમ્બ્ય સ્ખલનં યત્ર જાયતે ।
ઉત્તિષ્ઠતિ જનસ્સર્વોઽધ્યક્ષેણૈતત્સમીક્ષ્યતે ॥ ૮૮॥

નામરૂપાત્મકૈર્ભાવૈર્બધ્યન્તે નિખિલા જનાઃ ।
અવિદ્યાકલિતાશ્ચૈવ તાદૃક્પ્રકૃતિવૈભવાત્ ॥ ૮૯॥

આત્મનસ્સૂક્ષ્મપ્રકૃતિં પ્રવૃત્તિઞ્ચાઽનુસૃત્ય વૈ ।
નામરૂપાત્મનોશ્શબ્દભાવયોરવલમ્બનાત્ ॥ ૯૦॥

યો યોગઃ સાધ્યતે સોઽયં મન્ત્રયોગઃ પ્રકીર્તિતઃ ।
પ્રાણાઽપાનનાદબિન્દુજીવાત્મપરમાત્મનામ્ ॥ ૯૧॥

મેલનાદ્ઘટતે યસ્માત્તસ્માદ્વૈ ઘટ ઉચ્યતે ।
આમકુમ્ભમિવાઽમ્ભસ્થં જીર્યમાણં સદા ઘટમ્ ॥ ૯૨॥

યોગાનલેન સન્દહ્ય ઘટશુદ્ધિં સમાચરેત્ ।
ઘટયોગસમાયોગાદ્ધઠયોગઃ પ્રકીર્તિતઃ ॥ ૯૩॥

મન્ત્રાદ્ધઠેન સમ્પાદ્યો યોગોઽયમિતિ વા પ્રિયે ।
હઠયોગ ઇતિ પ્રોક્તો હઠાજ્જીવશુભપ્રદઃ ॥ ૯૪॥

હઠયોગેન પ્રથમં જીર્યમાણામિમાં તનુમ્ ।
દ્રઢયન્સૂક્ષ્મદેહં વૈ કુર્યાદ્યોગયુજં પુનઃ ॥ ૯૫॥

સ્થૂલઃ સૂક્ષ્મસ્ય દેહો વૈ પરિણામાન્તરં યતઃ ।
કાદિવર્ણાન્સમભ્યસ્ય શાસ્ત્રજ્ઞાનં યથાક્રમમ્ ॥ ૯૬॥

યથોપલભ્યતે તદ્વત્સ્થૂલદેહસ્ય સાધનૈઃ ।
યોગેન મનસો યોગો હઠયોગઃ પ્રકીર્તિતઃ ॥ ૯૭॥

બ્રહ્માણ્ડપિણ્ડે સદૃશે બ્રહ્મપ્રકૃતિસમ્ભવાત્ ।
સમષ્ટિવ્યષ્ટિસમ્બન્ધાદેકસમ્બન્ધગુમ્ફિતે ॥ ૯૮॥

ઋષિદેવાશ્ચ પિતરો નિત્યં પ્રકૃતિપૂરુષૌ ।
તિષ્ઠન્તિ પિણ્ડે બ્રહ્માણ્ડે ગ્રહનક્ષત્રરાશયઃ ॥ ૯૯॥

પિણ્ડજ્ઞાનેન બ્રહ્માણ્ડજ્ઞાનં ભવતિ નિશ્ચિતમ્ ।
ગુરૂપદેશતઃ પિણ્ડજ્ઞાનમાપ્ત્વા યથાયથમ્ ॥ ૧૦૦॥

તતો નિપુણયા યુક્ત્યા પુરુષે પ્રકૃતેર્લયઃ ।
લયયોગાઽભિધેયઃ સ્યાત્ કૃતઃ શુદ્ધૈર્મહર્ષિભિઃ ॥ ૧૦૧॥

ભવન્તિ મન્ત્રયોગસ્ય ષોડશાઙ્ગાનિ નિશ્ચિતમ્ ।
યથા સુધાંશોર્જાયન્તે કલાઃ ષોડશ શોભનાઃ ॥ ૧૦૨॥

ભક્તિઃ શુદ્ધિશ્ચાઽઽસનઞ્ચ પઞ્ચાઙ્ગસ્યાઽપિ સેવનમ્ ।
આચારધારણે દિવ્યદેશસેવનમિત્યપિ ॥ ૧૦૩॥

પ્રાણક્રિયા તથા મુદ્રા તર્પણં હવનં બલિઃ ।
યાગો જપસ્તથા ધ્યાનં સમાધિશ્ચેતિ ષોડશ ॥ ૧૦૪॥

ષટ્કર્માઽઽસનમુદ્રાઃ પ્રત્યાહારઃ પ્રાણસંયમશ્ચૈવ ।
ધ્યાનસમાધી સપ્તૈવાઙ્ગાનિ સ્યુર્હઠસ્ય યોગસ્ય ॥ ૧૦૫॥

અઙ્ગાનિ લયયોગસ્ય નવૈવેતિ બુધા વિદુઃ ।
યમશ્ચ નિયમશ્ચૈવ સ્થૂલસૂક્ષ્મક્રિયે તથા ॥ ૧૦૬॥

પ્રત્યાહારો ધારણા ચ ધ્યાનઞ્ચાપિ લયક્રિયા ।
સમાધિશ્ચ નવાઙ્ગાનિ લયયોગસ્ય નિશ્ચિતમ્ ॥ ૧૦૭॥

ધ્યાનં વૈ મન્ત્રયોગસ્યાઽધ્યાત્મભાવાદ્વિનિર્ગતમ્ ।
પરાનન્દમયે ભાવેઽતીન્દ્રિયે ચ વિલક્ષણે ॥ ૧૦૮॥

ભ્રમદ્ભિઃ સાધકશ્રેયોવાઞ્છદ્ભિર્યોગવિત્તમૈઃ ।
ઉપાસનાં પઞ્ચવિધાં જ્ઞાત્વા સાધકયોગ્યતામ્ ॥ ૧૦૯॥

મન્ત્રધ્યાનં હિ કથિતમધ્યાત્મસ્યાઽનુસારતઃ ।
વેદતન્ત્રપુરાણેષુ મન્ત્રશાસ્ત્રપ્રવર્તકૈઃ ॥ ૧૧૦॥

વર્ણિતં શ્રેયૈચ્છદ્ભિર્મન્ત્રયોગપરસ્ય વૈ ।
ધ્યાનાનાં વૈ બહુત્વેઽપિ તત્પ્રોક્તં પઞ્ચધૈવ હિ ॥ ૧૧૧॥

તેષાં ભાવમયત્વેન સમાધિરધિગમ્યતે ।
મન્ત્રયોગો હઠશ્ચૈવ લયયોગઃ પૃથક્ પૃથક્ ॥ ૧૧૨॥

સ્થૂલં જ્યોતિસ્તથા બિન્દુ ધ્યાનં તુ ત્રિવિધં વિદુઃ ।
સ્થૂલં મૂર્તિમયં પ્રોક્તં જ્યોતિસ્તેજોમયં ભવેત્ ॥ ૧૧૩॥

બિન્દું બિન્દુમયં બ્રહ્મ કુણ્ડલી પરદેવતા ।
સૃષ્ટિસ્થિતિવિનાશાનાં હેતુતા મનસિ સ્થિતા ॥ ૧૧૪॥

તત્સાહાય્યાત્સાધ્યતે યો રાજયોગ ઇતિ સ્મૃતઃ ।
મન્ત્રે હઠે લયે ચૈવ સિદ્ધિમાસાદ્ય યત્નતઃ ॥ ૧૧૫॥

પૂર્ણાઽધિકારમાપ્નોતિ રાજયોગપરો નરઃ ।
સમાધિર્મન્ત્રયોગસ્ય મહાભાવ ઇતીરિતઃ ॥ ૧૧૬॥

હઠસ્ય ચ મહાબોધઃ સમાધિસ્તેન સિધ્યતિ ।

પ્રશસ્તો લયયોગસ્ય સમાધિર્હિ મહાલયઃ ॥ ૧૧૭॥

વિચારબુદ્ધેઃ પ્રાધાન્યં રાજયોગસ્ય સાધને ।
બ્રહ્મધ્યાનં હિ તદ્ધ્યાનં સમાધિર્નિર્વિકલ્પકઃ ॥ ૧૧૮॥

તેનોપલબ્ધસિદ્ધિર્હિ જીવન્મુક્તઃ પ્રકથ્યતે ।
ઉપલબ્ધ મહાભાવા મહાબોધાઽન્વિતાશ્ચ વા ॥ ૧૧૯॥

મહાલયં પ્રપન્નાશ્ચ તત્ત્વજ્ઞાનાઽવલમ્બતઃ ।
યોગિનો રાજયોગસ્ય ભૂમિમાસાદયન્તિ તે ॥ ૧૨૦॥

યોગસાધનમૂર્દ્ધન્યો રાજયોગોઽભિધીયતે ॥ ૧૨૧॥

શ્રીમહાદેવ્યુવાચ ।
યોગેશ જગદાધાર કતિધોપાસના ચ કે ।
તદ્વિધેર્ભગવન્ ભેદા મુક્તિમાર્ગપ્રદર્શિનઃ ॥ ૧૨૨॥

તસ્યા કે દિવ્યદેશાશ્ચ દિવ્યભાવેન ભાસ્વરાઃ ।
તત્સર્વં કૃપયા નાથ વદસ્વ વદતાં વર ॥ ૧૨૩॥

શ્રીમહાદેવ ઉવાચ ।
સગુણો નિર્ગુણશ્ચાઽપિ દ્વિવિધો ભેદ ઈર્યતે ।
ઉપાસનાવિધેર્દેવિ સગુણોઽપિ દ્વિધા મતઃ ॥ ૧૨૪॥

સકામોપાસનાયાશ્ચ ભેદા યદ્યપિ નૈકશઃ ।
પરન્ત્વનન્યભક્તાનાં જનાનાં મુક્તિમિચ્છતામ્ ॥ ૧૨૫॥

ભેદત્રિતયમેવૈતદ્રહસ્યં દેવિ ગોપિતમ્ ।
વક્ષ્યે ગુપ્તરહસ્યં તદ્ભવતીં ભાગ્યશાલિનીમ્ ॥ ૧૨૬॥

સમાહિતેન શાન્તેન સ્વાન્તેનૈવાઽવધાર્યતામ્ ।
પઞ્ચાનામપિ દેવાનાં બ્રહ્મણો નિર્ગુણસ્ય ચ ॥ ૧૨૭॥

લીલાવિગ્રહરૂપાણાઞ્ચેત્યુપાસ્તિસ્ત્રિધા મતા ।
વિષ્ણુઃ સૂર્યશ્ચ શક્તિશ્ચ ગણાધીશશ્ચ શઙ્કરઃ ॥ ૧૨૮॥

પઞ્ચોપાસ્યાઃ સદા દેવિ સગુણોપાસનાવિધૌ ।
એતે પઞ્ચ મહેશાનિ સગુણો ભેદ ઈરિતઃ ॥ ૧૨૯॥

સચ્ચિદાનન્દરૂપસ્ય બ્રહ્મણો નાઽત્ર સંશયઃ ।
નિર્ગુણોઽપિ નિરાકારો વ્યાપકઃ સ પરાત્પરઃ ॥ ૧૩૦॥

સાધકાનાં હિ કલ્યાણં વિધાતું વસુધાતલે ।
બિભર્તિ સગુણં રૂપં ત્વત્સાહાય્યાત્પતિવ્રતે ॥ ૧૩૧॥

યથા ગવાં શરીરેષુ વ્યાપ્તં દુગ્ધં રસાત્મકમ્ ।
પરં પયોધરાદેવ કેવલં ક્ષરતે ધ્રુવમ્ ॥ ૧૩૨॥

તથૈવ સર્વવ્યાપ્તોઽપિ દેવો વ્યાપકભાવતઃ ।
દિવ્યષોડશદેશેષુ પૂજ્યતે પરમેશ્વરઃ ॥ ૧૩૩॥

વહ્ન્યમ્બુલિઙ્ગકુડ્યાનિ સ્થણ્ડિલં પટમણ્ડલે ।
વિશિખં નિત્યયન્ત્રઞ્ચ ભાવયન્ત્રઞ્ચ વિગ્રહઃ ॥ ૧૩૪॥

પીઠશ્ચાપિ વિભૂતિશ્ચ હૃન્મૂર્દ્ધાપિ મહેશ્વરિ ।
એતે ષોડશ દિવ્યાશ્ચ દેશાઃ પ્રોક્તા મયાઽનઘે ॥ ૧૩૫॥

યદ્યચ્છરીરમાશ્રિત્ય ભગવાન્સર્વશક્તિમાન્ ।
વતીર્ણો વિવિધા લીલા વિધાય વસુધાતલે ॥ ૧૩૬॥

જગત્પાલયતે દેવિ લીલાવિગ્રહ એવ સઃ ।
ઉપાસનાઽનુસારેણ વેદશાસ્ત્રેષુ ભૂરિશઃ ॥ ૧૩૭॥

લીલાવિગ્રહરૂપાણામિતિહાસોઽપિ લભ્યતે ।
તદુપાસનકઞ્ચાઽપિ સગુણં પરિકીર્તિતમ્ ॥ ૧૩૮॥

વિષ્ણોઃ સૂર્યશ્ચ શક્તેશ્ચ ગણેશસ્ય શિવસ્ય ચ ।
ગીતાસુ ગીતા યે શબ્દા વિષ્ણુસૂર્યાદયઃ પ્રિયે ॥ ૧૩૯॥

બ્રહ્મણશ્ચાદ્વિતીયસ્ય સાક્ષાત્તે ચાપિ વાચકઃ ।
ભક્તિસ્તુ ત્રિવિધા જ્ઞેયા વૈધી રાગાત્મિકા પરા ॥ ૧૪૦॥

દેવે પરોઽનુરાગસ્તુ ભક્તિઃ સમ્પ્રોચ્યતે બુધૈઃ ।
વિધિના યા વિનિર્ણીતા નિષેધેન તથા પુનઃ ॥ ૧૪૧॥

સાધ્યમાના ચ યા ધીરૈઃ સા વૈધી ભક્તિરુચ્યતે ।
યયાઽઽસ્વાદ્ય રસાન્ભક્તેર્ભાવે મજ્જતિ સાધકઃ ॥ ૧૪૨॥

રાગાત્મિકા સા કથિતા ભક્તિયોગવિશારદૈઃ ।
પરાઽઽનન્દપ્રદા ભક્તિઃ પરાભક્તિર્મતા બુધૈઃ ॥ ૧૪૩॥

યા પ્રાપ્યતે સમાધિસ્થૈર્યોગિભિર્યોગપારગૈઃ ।

ત્રૈગુણ્યભેદાસ્ત્રિવિધા ભક્તા વૈ પરિકીર્તિતાઃ ॥ ૧૪૪॥

આર્તો જિજ્ઞાસુરર્થાર્થી તથા ત્રિગુણતઃ પરઃ ।
પરાભક્ત્યધિકારી યો જ્ઞાનિભક્તઃ સ તુર્યકઃ ॥ ૧૪૫॥

ઉપાસકાઃ સ્યુસ્ત્રિવિધાસ્ત્રિગુણસ્યાઽનુસારતઃ ।
બ્રહ્મોપાસક એવાઽત્ર શ્રેષ્ઠઃ પ્રોક્તો મનીષિભિઃ ॥ ૧૪૬॥

પ્રથમા સગુણોપાસ્તિરવતારાઽર્ચનાશ્ચ યાઃ ।
વિહિતા બ્રહ્મબુદ્ધ્યા ચેદત્રૈવાઽન્તર્ભવન્તિ તાઃ ॥ ૧૪૭॥

સકામબુદ્ધ્યા વિહિતં દેવર્ષિપિતૃપૂજનમ્ ।
મધ્યમં મધ્યમા જ્ઞેયાસ્તત્કર્તારસ્તથા પુનઃ ॥ ૧૪૮॥

અધમા વૈ સમાખ્યાતાઃ ક્ષુદ્રશક્તિસમર્ચકાઃ ।
પ્રેત્યાદ્યુપાસકાશ્ચૈવ વિજ્ઞેયા હ્યધમાઽધમાઃ ॥ ૧૪૯॥

સર્વોપાસનહીનાસ્તુ પશવઃ પરિકીર્તિતાઃ ।
બ્રહ્મોપાસનમેવાઽત્ર મુખ્યં પરમમઙ્ગલમ્ ॥ ૧૫૦॥

નિઃશ્રેયસકરં જ્ઞેયં સર્વશ્રેષ્ઠં શુભાવહમ્ ॥ ૧૫૧॥

શ્રીમહાદેવ્યુવાચ ।
યથા મે ગુરુમાહાત્મ્યં સમ્યગ્જ્ઞાતં ભવેત્પ્રભો ।
તથા વિસ્તરતો નાથ તન્માહાત્મ્યમુદાહર ॥ ૧૫૨॥

સદ્ગુરોમહિમા દેવ સમ્યગ્જ્ઞાતઃ શ્રુતો ભુવિ ।
અજ્ઞાનતમસાઽઽચ્છન્નં મનોમલમપોહતિ ॥ ૧૫૩॥

શ્રીમહાદેવ ઉવાચ ।
ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુર્ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુરેવ પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૫૪॥

અખણ્ડમણ્ડલાકારં વ્યાપ્તં યેન ચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૫૫॥

અજ્ઞાનતિમિરાઽન્ધસ્ય જ્ઞાનાઞ્જનશલાકયા ।
ચક્ષુરુન્મીલિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૫૬॥

સ્થાવરં જઙ્ગમં વ્યાપ્તં યત્કિઞ્ચિત્સચરાઽચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૫૭॥

ચિન્મયં વ્યાપ્નુવન્સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૫૮॥

સર્વશ્રુતિશિરોરત્નવિરાજિતપદાઽમ્બુજઃ ।
વેદાન્તાઽમ્બુજસૂર્યો યસ્તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૫૯॥

ચેતનઃ શાશ્વતઃ શાન્તો વ્યોમાઽતીતો નિરઞ્જનઃ ।
બિન્દુનાદકલાતીતસ્તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૦॥

જ્ઞાનશક્તિસમારૂઢસ્તત્ત્વમાલાવિભૂષિતઃ ।
ભુક્તિમુક્તિપ્રદાતા ચ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૧॥

અનેકજન્મસમ્પ્રાપ્તકર્મબન્ધવિદાહિને ।
આત્મજ્ઞાનપ્રદાનેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૨॥

શોષણં ભવસિન્ધોશ્ચ જ્ઞાપનં સારસમ્પદઃ ।
ગુરોઃ પાદોદકં સમ્યક્ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૩॥

ન ગુરોરધિકં તત્ત્વં ન ગુરોરધિકં તપઃ ।
તત્ત્વજ્ઞાનાત્પરં નાઽસ્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૪॥

મન્નાથઃ શ્રીજગન્નાથો મદ્ગુરુઃ શ્રીજગદ્ગુરુઃ ।
મદાત્મા સર્વભૂતાત્મા તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૫॥

ગુરુરાદિરનાદિશ્ચ ગુરુઃ પરમદૈવતમ્ ।
ગુરોઃ પરતરં નાઽસ્તિ તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૬૬॥

ધ્યાનમૂલં ગુરોર્મૂર્તિઃ પૂજામૂલં ગુરોઃ પદમ્ ।
મન્ત્રમૂલં ગુરોર્વાક્યં મોક્ષમૂલં ગુરોઃ કૃપા ॥ ૧૬૭॥

સપ્તસાગરપર્યન્તતીર્થસ્નાનાદિકૈઃ ફલમ્ ।
ગુરોરઙ્ઘ્રિપયોબિન્દુસહસ્રાંશેન દુર્લભમ્ ॥ ૧૬૮॥

ગુરુરેવ જગત્સર્વં બ્રહ્મવિષ્ણુશિવાત્મકમ્ ।
ગુરોઃ પરતરં નાઽસ્તિ તસ્માત્ સમ્પૂજયેદ્ગુરુમ્ ॥ ૧૬૯॥

જ્ઞાનં વિના મુક્તિપદં લભતે ગુરુભક્તિતઃ ।
ગુરોઃ પરતરં નાઽસ્તિ ધ્યેયોઽસૌ ગુરુમાર્ગિણા ॥ ૧૭૦॥

ગુરોઃ કૃપાપ્રસાદેન બ્રહ્મવિષ્ણુસદાશિવાઃ ।

સૃષ્ટ્યાદિકસમર્થાસ્તે કેવલં ગુરુસેવયા ॥ ૧૭૧॥

દેવકિન્નરગન્ધર્વાઃ પિતરો યક્ષચારણાઃ ।
મુનયોઽપિ ન જાનન્તિ ગુરુશુશ્રૂષણાવિધિમ્ ॥ ૧૭૨॥

ન મુક્તા દેવગન્ધર્વાઃ પિતરો યક્ષકિન્નરાઃ ।
ઋષયઃ સર્વસિદ્ધાશ્ચ ગુરુસેવાપરાઙ્મુખાઃ ॥ ૧૭૩॥

શ્રુતિસ્મૃતિમવિજ્ઞાય કેવલં ગુરુસેવયા ।
તે વૈ સંન્યાસિનઃ પ્રોક્તા ઇતરે વેષધારિણઃ ॥ ૧૭૪॥

ગુરોઃ કૃપાપ્રસાદેન આત્મારામો હિ લભ્યતે ।
અનેન ગુરુમાર્ગેણ આત્મજ્ઞાનં પ્રવર્તતે ॥ ૧૭૫॥

સર્વપાપવિશુદ્ધાત્મા શ્રીગુરોઃ પાદસેવનાત્ ।
સર્વતીર્થાવગાહસ્ય ફલં પ્રાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૭૬॥

યજ્ઞવ્રતતપોદાનજપતીર્થાઽનુસેવનમ્ ।
ગુરુતત્ત્વમવિજ્ઞાય નિષ્ફલં નાઽત્ર સંશયઃ ॥ ૧૭૭॥

મન્ત્રરાજમિદં દેવિ ગુરુરિત્યક્ષરદ્વયમ્ ।
શ્રુતિવેદાન્તવાક્યેન ગુરુઃ સાક્ષાત્પરં પદમ્ ॥ ૧૭૮॥

ગુરુર્દેવો ગુરુર્ધર્મો ગુરુનિષ્ઠા પરં તપઃ ।
ગુરોઃ પરતરં નાસ્તિ નાસ્તિ તત્ત્વં ગુરોઃ પરમ્ ॥ ૧૭૯॥

ધન્યા માતા પિતા ધન્યો ધન્યો વંશઃ કુલં તથા ।
ધન્યા ચ વસુધા દેવિ ગુરુભક્તિઃ સુદુર્લભા ॥ ૧૮૦॥

શરીરમિન્દ્રિયપ્રાણા અર્થસ્વજનબાન્ધવાઃ ।
માતા પિતા કુલં દેવિ ગુરુરેવ ન સંશયઃ ॥ ૧૮૧॥

આજન્મકોટ્યાં દેવેશિ જપવ્રતતપઃક્રિયાઃ ।
એતત્સર્વં સમં દેવિ ગુરુસન્તોષમાત્રતઃ ॥ ૧૮૨॥

વિદ્યાધનમદેનૈવ મન્દભાગ્યાશ્ચ યે નરાઃ ।
ગુરોઃ સેવાં ન કુર્વન્તિ સત્યં સત્યં વદામ્યહમ્ ॥ ૧૮૩॥

ગુરુસેવાપરં તીર્થમન્યત્તીર્થમનર્થકમ્ ।
સર્વતીર્થાશ્રયં દેવિ સદ્ગુરોશ્ચરણામ્બુજમ્ ॥ ૧૮૪॥

ગુરુધ્યાનં મહાપુણ્યં ભુક્તિમુક્તિપ્રદાયકમ્ ।
વક્ષ્યામિ તવ દેવેશિ શ ૃણુષ્વ કમલાનને ॥ ૧૮૫॥

પ્રાતઃ શિરસિ શુક્લાબ્જે દ્વિનેત્રં દ્વિભુજં ગુરુમ્ ।
વરાઽભયકરં શાન્તં સ્મરેત્તન્નામપૂર્વકમ્ ॥ ૧૮૬॥

વામોરુશક્તિસહિતં કારુણ્યેનાઽવલોકિતમ્ ।
પ્રિયયા સવ્યહસ્તેન ધૃતચારુકલેવરમ્ ॥ ૧૮૭॥

વામેનોત્પલધારિણ્યા રક્તાઽઽભરણભૂષયા ।
જ્ઞાનાઽઽનન્દસમાયુક્તં સ્મરેત્તન્નામપૂર્વકમ્ ॥ ૧૮૮॥

અખણ્ડમણ્ડલાઽઽકારં વ્યાપ્તં યેન ચરાચરમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥ ૧૮૯॥

નમોઽસ્તુ ગુરવે તસ્મૈ ઇષ્ટદેવસ્વરૂપિણે ।
યસ્ય વાક્યાઽમૃતં હન્તિ વિષં સંસારસંજ્ઞિતમ્ ॥ ૧૯૦॥

શ્રીમહાદેવ્યુવાચ ।
મદેકહૃદયાઽઽનન્દ જગદાત્મન્ મહેશ્વર ।
ઉપાસ્યસ્ય રહસ્યં મે માહાત્મ્યઞ્ચાપિ સદ્ગુરોઃ ॥ ૧૯૧॥

વર્ણિતં યત્ત્વયા નાથ કૃતકૃત્યાઽસ્મિ સામ્પ્રતમ્ ।
ભૂયોઽપિ શ્રોતુમિચ્છામિ ત્વન્મુખાજ્જગદીશ્વર ॥ ૧૯૨॥

પરતત્ત્વૈકરૂપસ્ય તત્ત્વાઽતીતપરાઽઽત્મનઃ ।
સમાસેન સ્વરૂપં મે વર્ણયિત્વા કૃપાં કુરુ ॥ ૧૯૩॥

શ્રીમહદેવ ઉવાચ ।
સ એક એવ સદ્રૂપઃ સત્યોઽદ્વૈતઃ પરાત્પરઃ ।
સ્વપ્રકાશઃ સદા પૂર્ણઃ સચ્ચિદાનન્દલક્ષણઃ ॥ ૧૯૪॥

નિર્વિકારો નિરાધારો નિર્વિશેષો નિરાકુલઃ ।
ગુણાતીતઃ સર્વસાક્ષી સર્વાત્મા સર્વદૃગ્વિભુઃ ॥ ૧૯૫॥

ગૂઢઃ સર્વેષુ ભૂતેષુ સર્વવ્યાપી સનાતનઃ ।
સર્વેન્દ્રિય ગુણાભાસઃ સર્વેન્દ્રિયવિવર્જિતઃ ॥ ૧૯૬॥

લોકાઽતીતો લોકહેતુરવાઙ્મનસગોચરઃ ।
સ વેત્તિ વિશ્વં સર્વજ્ઞસ્તં ન જાનાતિ કશ્ચન ॥ ૧૯૭॥

તદધીનં જગત્સર્વં ત્રૈલોક્યં સચરાઽચરમ્ ।
તદાલમ્બનતસ્તિષ્ઠેદવિતર્ક્યમિદં જગત્ ॥ ૧૯૮॥

તત્સત્યતામુપાઽઽશ્રિત્ય સદ્વદ્ભાતિ પૃથક્ પૃથક્ ।
તેનૈવ હેતુભૂતેન વયં જાતા મહેશ્વરિ ॥ ૧૯૯॥

કારણં સર્વભૂતાનાં સ એકઃ પરમેશ્વરઃ ।
લોકેષુ સૃષ્ટિકરણાત્સ્રષ્ટા બ્રહ્મેતિ ગીયતે ॥ ૨૦૦॥

વિષ્ણુઃ પાલયિતા દેવિ સંહર્તાઽહં તદિચ્છયા ।
ઇન્દ્રાઽઽદયો લોકપાલાઃ સર્વે તદ્વશવર્તિનઃ ॥ ૨૦૧॥

સ્વે સ્વેઽધિકારે નિરતાસ્તે શાસતિ તદાજ્ઞયા ।
ત્વં પુરા પ્રકૃતિસ્તસ્ય પૂજ્યાઽસિ ભુવનત્રયે ॥ ૨૦૨॥

તેનાઽન્તર્યામિરૂપેણ તત્તદ્વિષયયોજિતાઃ ।
સ્વસ્વકર્મ પ્રકુર્વન્તિ ન સ્વતન્ત્રાઃ કદાચન ॥ ૨૦૩॥

યદ્ભયાદ્વાતિ વાતોઽપિ સૂર્યસ્તપતિ યદ્ભયાત્ ।
વર્ષન્તિ તોયદાઃ કાલે પુષ્પ્યન્તિ તરવો વને ॥ ૨૦૪॥

કાલં કલયતે કાલે મૃત્યોર્મૃત્યુર્ભિયો ભયમ્ ।
વેદાન્તવેદ્યો ભગવાન્યત્તચ્છબ્દોપલક્ષિતઃ ॥ ૨૦૫॥

સર્વે દેવાશ્ચ દેવ્યશ્ચ તન્મયાઃ સુરવન્દિતે ।
આબ્રહ્મસ્તમ્બપર્યન્તં તન્મયં સકલં જગત્ ॥ ૨૦૬॥

તસ્મિંસ્તુષ્ટે જગત્તુષ્ટં પ્રીણિતે પ્રીણિતં જગત્ ।
તદારાધનતો દેવિ સર્વેષાં પ્રીણનં ભવેત્ ॥ ૨૦૭॥

તરોર્મૂલાઽભિષીકેણ યથા તદ્ભુજપલ્લવાઃ ।
તૃપ્યન્તિ તદનુષ્ઠાનાત્તથા સર્વેઽમરાદયઃ ॥ ૨૦૮॥

શ્રીમહાદેવ્યુવાચ ।
સંસારરોગહૃન્નાથ કરુણાવરુણાઽઽલય ।
ગુરોર્માહાત્મ્યપૂર્ણા યા ગુરોર્ગીતા સુવર્ણિતા ॥ ૨૦૯॥

તત્સ્વાધ્યાયસ્ય માહાત્મ્યં ફલઞ્ચાઽપિ વિનિર્દિશ ।
જીવમઙ્ગલમેતેન કૃપાતોઽતઃ કૃપાઽર્ણવ ॥ ૨૧૦॥

સમ્યગ્વિવિચ્ય સંવર્ણ્ય વિનોદય દયાર્ણવ ।

ત્વદૃતે કો હિ દેવેશ શિક્ષાં મેઽન્યો વિધાસ્યતિ ॥ ૨૧૧॥

શ્રીમહાદેવ ઉવાચ ।
ઇદં તુ ભક્તિભાવેન પઠ્યતે શ્રૂયતેઽથવા ।
લિખિત્વા વા પ્રદીયેત સર્વકામફલપ્રદમ્ ॥ ૨૧૨॥

ગુરુગીતાઽભિધં દેવિ શુદ્ધં તત્ત્વં મયોદિતમ્ ।
ભવવ્યાધિવિનાશાર્થં સ્વયમેવ સદા જપેત્ ॥ ૨૧૩॥

ગુરુગીતાઽક્ષરૈકૈકં મન્ત્રરાજમિદં પ્રિયે ।
અનેન વિવિધા મન્ત્રાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૨૧૪॥

સર્વપાપહરં સ્તોત્રં સર્વદારિદ્ર્યનાશનમ્ ।
અકાલમૃત્યુહરણં સર્વસઙ્કટનાશનમ્ ॥ ૨૧૫॥

યક્ષરાક્ષસભૂતાનાં ચૌરવ્યાઘ્રભયાઽપહમ્ ।
મહાવ્યાધિ હરઞ્ચૈવ વિભૂતિસિદ્ધિદં ધ્રુવમ્ ॥ ૨૧૬॥

મોહનં સર્વભૂતાનાં પરં બન્ધનમોચનમ્ ।
દેવભૂતપ્રિયકરં લોકાન્સ્વવશમાનયેત્ ॥ ૨૧૭॥

મુખસ્તમ્ભકરં નૃણાં સદ્ગુણાનાં વિવર્ધનમ્ ।
દુષ્કર્મનાશનઞ્ચૈવ સત્કર્મસિદ્ધિદં ભવેત્ ॥ ૨૧૮॥

ભક્તિદં સિદ્ધયેત્ કાર્યં નવગ્રહભયાઽપહમ્ ।
દુઃસ્વપ્નનાશનઞ્ચૈવ સત્કર્મસિદ્ધિદં ભવેત્ ॥ ૨૧૯॥

સર્વશાન્તિકરં નિત્યં વન્ધ્યાપુત્રફલપ્રદમ્ ।
અવૈધવ્યકરં સ્ત્રીણાં સૌભાગ્યદાયકં પરમ્ ॥ ૨૨૦॥

આયુરારોગ્યમૈશ્વર્યપુત્રપૌત્રાદિવર્ધકમ્ ।
નિષ્કામતસ્ત્રિવારં વા જપન્મોક્ષમવાપ્નુયાત્ ॥ ૨૨૧॥

સર્વદુઃખભયં વિઘ્નં નાશયેત્તાપહારકમ્ ।
સર્વબાધાપ્રશમનં ધર્માઽર્થકામમોક્ષદમ્ ॥ ૨૨૨॥

યો યં ચિન્તયતે કામં સ તમાપ્નોતિ નિશ્ચિતમ્ ।
કામિનાં કામધેનુશ્ચ કલ્પિતં ચ સુરદ્રુમઃ ॥ ૨૨૩॥

ચિન્તામણિશ્ચિન્તિતસ્ય સર્વમઙ્ગલકારકમ્ ।
જપેચ્છાક્તશ્ચ શૈવશ્ચ ગાણપત્યશ્ચ વૈષ્ણવઃ ॥ ૨૨૪॥

સૌરશ્ચ સિદ્ધિદં દેવિ ધર્માર્થકામમોક્ષદમ્ ।
સંસારમલનાશાઽર્થં ભવતાપનિવૃત્તયે ॥ ૨૨૫॥

ગુરુગીતાઽમ્ભસિ સ્નાનં તત્ત્વજ્ઞઃ કુરુતે સદા ।
યોગયુઞ્જાનચિત્તાનાં ગીતેયં જ્ઞાનવર્ધિકા ॥ ૨૨૬॥

ત્રિતાપતાપિતાનાઞ્ચ જીવાનાં પરમૌષધમ્ ।
સંસારાઽપારપાથોધૌ મજ્જતાં તરણિઃ શુભા ॥ ૨૨૭॥

દેશઃ શુદ્ધઃ સ યત્રાઽસૌ ગીતા તિષ્ઠતિ દુર્લભા ।
તત્ર દેવગણાઃ સર્વે ક્ષેત્રપીઠે વસન્તિ હિ ॥ ૨૨૮॥

શુચિરેવ સદા જ્ઞાની ગુરુગીતાજપેન તુ ।
તસ્ય દર્શનમાત્રેણ પુનર્જન્મ ન વિદ્યતે ॥ ૨૨૯॥

સત્યં સત્યં પુનઃ સત્યં નિજધર્મો મયોદિતઃ ।
ગુરુગીતાસમો નાઽસ્તિ સત્યં સત્યં વરાનને ॥ ૨૩૦॥

ઇતિ શ્રીગુરુગીતા સમાપ્તા ।

Dharmamandala print version
Encoded and proofread by Sunder Hattangadi

*Shri Guru Gita*

pdf was typeset on August 25, 2023

Please send corrections to *sanskrit@cheerful.com*